दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-85 | 1 | जनवरी 16, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् माघकृष्णत्रयोदशी
माघ 03 प्रविष्टांशः मङ्गलमयः भवेत्

2 मन्त्री विक्रमादित्यसिंहस्य अपरं महत्त्वपूर्णं वक्तव्यं प्रकाशे आगतम्- किं उक्तं तद् अवगच्छत्

3 Bijli Mahadev Ropeway- बिजली-महादेव- रज्जुमार्ग- प्रकरणे सर्वकाराय सप्ताहात्रयस्य समयः

5 KKSU Ramtek - कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालये मकरसंक्रान्तिपर्वणि सूर्ययागः सम्यक् सम्पन्नः

# जयपुर-नगरे अष्टसप्तति-तमे सेना-दिवसस्य अवसरे आयोजितं पथसञ्चलने भारतीयसेनायाः शौर्यस्य, साहसस्य, अत्याधुनिक-सैन्यक्षमतायाः च प्रदर्शनम् अभवत्



**हिमसंस्कृतवार्ताः** - जयपुर-नगरे अष्टसप्तति-तमे सेना-दिवसस्य अवसरे भव्यं पथ संचलनम् आयोजितम्। पथसञ्चलने भारतीयसेनायाः शौर्यस्य, साहसस्य, अत्याधुनिक-सैन्यक्षमतायाः च प्रदर्शनम् अभवत्। एतत् प्रथमं अवसरम् अस्ति यदा सेना-दिवसस्य पथसंचलनम् सैन्य छावनी क्षेत्रात् बहिः, प्रत्यक्षतया जनानां मध्ये आयोजितम् अस्ति। सेनाध्यक्षः जनरल उपेन्द्र द्विवेदी राष्ट्रसेवायां सर्वोच्च-बलिदानम् कर्तृणां वीरभटानां परिवारेभ्यः सेनापदकं प्रदत्तवान्। वार्ताहरैः सह वार्तालापं कुर्वन्, सेनाध्यक्षः जनरल-द्विवेदी अवदत् यत्, भारतीयसेना वर्तमानप्रतिसन्धिं तथा च भविष्यस्य आवश्यकतां च पूरयितुं स्वयमेव सज्जतां कुर्वदस्ति । अस्मिन् कार्यक्रमे सेनायाः आत्याधुनिक युद्धक्षमतायाः विस्तृतप्रदर्शनम् अपि अभवत्, यत् आत्मानिर्भरभारतस्य भावं दृढतया प्रतिविम्बयति। नेपाल-सेनायाः वाद्यवृन्दाः अस्मिन् कार्यक्रमे विशेष-पलं योजितवन्तः, यत् द्वयोः राष्ट्रयोः मध्ये दीर्घकालिक मित्रतायाः रक्षा-सहयोगस्य च प्रतीकम् आसीत्। त्रीणि-किलोमीटर-परिमिते मार्गे, सहस्रशः जनाः पथ संचलनम् दृष्टवन्तः ।

**सेनादिवसस्य अवसरे राष्ट्रपतिः, उपराष्ट्रपतिः, प्रधानमन्त्री च वीरसैनिकान्, पूर्वसैनिकान्, तेषां परिवारान् च अभिवादनं कृतवन्तः।**

सेनादिवसस्य अवसरे राष्ट्रपतिः द्रौपदीमुर्मुः, उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी च वीरसैनिकान्, पूर्वसैनिकान्, तेषां परिवारान् च अभिवादनं कृतवन्तः। सामाजिकान्तर्जालीये सन्देशे राष्ट्रपतिः मुर्मुः अवदत् यत् भारतीयसेना राष्ट्रस्य एकतायाः, सार्वभौमस्य, अखण्डतायाः च रक्षणे दृढतया कार्यं करोति। सामाजिकान्तर्जालीये सन्देशे श्रीराधाकृष्णन् वर्यः अवदत् यत् राष्ट्रस्य रक्षणे सैनिकानां साहसः, अनुशासनं, सर्वोच्चं बलिदानम् च प्रत्येकं नागरिकं प्रेरयति। प्रधानमन्त्री श्रीमोदी भारतीयसेनायाः साहसस्य दृढप्रतिबद्धतायाः च अभिवादनं कृतवान्। सः अवदत् यत्, देशस्य सैनिकाः अत्यन्तं दुष्कर-परिस्थित्याम् अपि स्वक्षमतां प्रदर्शितवन्तः। अस्मिन् अवसरे स्वस्य सन्देशे रक्षामंत्री राजनाथसिंहः आधुनिकस्य, आत्मनिर्भरस्य, भविष्यस्य कृते सज्जितसेनायाः निर्माणाय सर्वकारस्य प्रतिबद्धतां दृढीकृतवान्।

**सुभाषितम्**

**अधमाः धनमिच्छन्ति,**
**धनं मानं च मध्यमाः।**
**उत्तमाः मानमिच्छन्ति,**
**मानो हि महतां धनम्॥**

अर्थात्- निम्न व्यक्ति केवल धन की इच्छा रखता है, मध्यम व्यक्ति धन और मान दोनों की ही इच्छा रखता है और उत्तम व्यक्ति केवल मान-सम्मान की इच्छा रखता है। मान- सम्मान का धन से अधिक महत्त्व होता है।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## इरान देशस्य यात्रां न कर्तुम् भारतेन स्वनागरिकान् दृढतया परामृष्टम्

**हिमसंस्कृतवार्ताः** - पश्चिम-एशियादेशे सर्वकारीय-विरोध-प्रदर्शनानाम् अनन्तरं देशस्य सुरक्षा-स्थितिः इतोऽपि क्षीणा जाता अतः इरान देशस्य यात्रां न कर्तुम् भारतेन स्वनागरिकान् दृढतया परामृष्टम्। विदेशमन्त्रालयेन एकस्मिन् परामर्श उक्तम् यत्, इरान-देशे वर्तमान-दृष्ट्या, भारतीय नागरिकाः अग्रिमसूचनापर्यन्तं इस्लामिक्-रिपब्लिक्-आफ्-इरान्-देशस्य यात्रां न कर्तुम् दृढतया सूचिता। एतदतिरिच्य, तेहरान्-नगरे भारतीय दूतावासेन एकस्मिन् परामर्शे उक्तं यत्, इरान्-देशे स्थित्यानुसारम्, सम्प्रति देशे स्थिताः भारतीय-नागरिकाः यथा छात्राः, तीर्थयात्रिणः, व्यावसायिनः, पर्यटकाः च वाणिज्यक-विमानयानेन परिवहनस्य उपलभ्य-माध्यमेन इरान्-देशात् निर्गन्तुं सूचिताः सन्ति। विदेशमन्त्रालयः अवदत् यत्, इरान् देशे आवासीय-वीजा-द्वारा निवसन्तः भारतीय-नागरिकाः भारतीय दूतावासे पञ्जीकरणं कर्तुं सूचिताः सन्ति, यदि पूर्वम् ते न कृतवन्तः ।

## यूरोपीयपरिषदः अध्यक्षः एन्तोनियो लूयिस सैनटोस दा कोस्टा, यूरोपीय-आयोगस्य अध्यक्षः च उर्सुला वान् डेर लेयेनः सप्तसप्तति तमे गणतन्त्रदिवस-समारोहे मुख्यातिथिः भविष्यति



**हिमसंस्कृतवार्ताः** - यूरोपीयपरिषदः अध्यक्षः एन्तोनियो लूयिस सैनटोस दा कोस्टा, यूरोपीय-आयोगस्य अध्यक्षः च उर्सुला वान् डेर् लेयेनः अस्मिन् मासे षड्विंशति दिनाङ्के कर्तव्यपथि सप्तसप्तति तमे गणतन्त्रदिवस-समारोहे मुख्यातिथिः भविष्यतः। प्रधानमन्त्रिणः नरेन्द्रमोदिनः आमन्त्रणे उभावपि अस्मिन् मासे पञ्चविंशति दिनाङ्कात् त्रिदिवसीय भारत-यात्रायां भविष्यतः। अस्मिन् मासे सप्तविंशति दिनाङ्के षोडशतमे भारत-यूरोपीयसङ्घस्य शिखरसम्मेलने अपि नेतारौ सह-अध्यक्षतां करिष्यतः। राष्ट्रपतिः कोस्टा, राष्ट्रपतिः वान् डेर् लेयेनः च राष्ट्रपतिना द्रौपदीमुर्मू वर्यया सह मिलित्वा प्रधानमन्त्रिणा मोदिना सह प्रतिनिधि-स्तरीय वार्तालापं करिष्यतः।

## नवदेहल्यां संविधान-सदने कॉमनवेल्थ-इत्यस्य अध्यक्षाणां पीठासीन-अधिकारिणां च सम्मेलनं सम्बोधितवान् प्रधानमन्त्री नरेन्द्रमोदी

**हिमसंस्कृतवार्ताः** - प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत्, भारते लोकतन्त्रस्य अर्थः अन्तिम जनं पर्यन्तं प्रापणम् अस्ति तथा च सर्वकारः प्रत्येकस्य जनस्य कृते जन-कल्याणस्य भावनया सह भेदं विनैव कार्यं कुर्वन् अस्ति। प्रधानमन्त्री नवदेहल्यां संविधान-सदने कॉमनवेल्थ-इत्यस्य अध्यक्षाणां पीठासीन अधिकारिणां सम्मेलनम् अभिसंबोधयन् आसीत्। सः अवदत् यत्, भारतेन विविधतां लोकतन्त्रस्य शक्तिरूपेण परिवर्तितम्। श्रीमोदिना उक्तं यत् विगतेषु केषुचित् वर्षेषु भारते प्रायः पञ्चविंशति कोटिजनाः निर्धन वर्गात् बहिः समागताः। प्रधानमन्त्री मोदी अवदत् यत्, भारते जनाः सर्वोपरि सन्ति, तेषां आकांक्षाः च सर्वोच्चप्राथमिकतायां सन्ति। सः अवदत् यत्, भारतं विविधतां स्वशक्तिरूपेण परिवर्त्य द्रुतगत्या वर्धमाना प्रमुख-अर्थव्यवस्थारूपेण उद्भुतम्। श्रीमोदी अवदत् यत्, अद्यत्वे भारते यू पी आई इतीदं विश्वस्य वृहत्तमा डिजिटल-देय-व्यवस्थास्ति।

## ए. आई. मॉडल ग्रोक् इत्येतत्, ए. आई. डीपफेक्स इत्यस्य विषये वैश्विक चिन्तायाः अनन्तरं, वास्तविकजनानां चित्रेषु सम्पादनेन वस्त्र-परिवर्तनस्य उपयोक्तृभ्यः अनुमतिः न प्रदास्यति




**हिमसंस्कृतवार्ताः** - एलन मस्क इत्यस्य ए. आई. माडल ग्रोक् इत्येतत्, ए. आई. डीपफेक्स इत्यस्य विषये वैश्विक-चिन्तायाः अनन्तरं, वास्तविकजनानां चित्रेषु सम्पादनेन वस्त्र-परिवर्तनस्य उपयोक्तृभ्यः अनुमतिः न प्रदास्यति। मलेशिया-इण्डोनेशिया-देशयोः प्रतिबन्धः, यू. के. देशस्य अधिकारिणां निन्दायाः च अनन्तरम् एतत् अभवत्।

# मन्त्री विक्रमादित्यसिंहस्य अपरं महत्त्वपूर्णं वक्तव्यं प्रकाशे आगतम्- किं उक्तं तद् अवगच्छत्





**हिमसंस्कृतवार्ताः- शिमला ।** बाह्यराज्येभ्यः आगतानाम् आईएएस– आईपीएस अधिकारिणां विषये विवादास्पद-वक्तव्यस्य अनन्तरं प्रकरणं शान्तिं न प्राप्नोति इव दृश्यते। लोकनिर्माणमन्त्री विक्रमादित्यसिंहः गुरुवासरे प्रातःकाले फेसबुक-पोस्ट प्रकाशितवान्। तत्र सः अलिखत्- “अस्माकं कृते हिमाचलप्रदेशस्य हितानि सर्वोपरि आसन्, सन्ति च, सदा भविष्यन्ति। प्रदेशहितैः सह किमपि समाधानम् न करिष्यामः।” ततः सः पत्रकारैः सह संवादे अवदत्- सर्वेषां प्रति मम आदरः अस्ति। वयं संघीयगणराज्ये वसामः, यत्र केन्द्र- राज्य- सर्वकारयोः स्वस्वं दायित्वं विद्यते। ये आईपीएस– आईएएस अधिकारी हिमाचले सेवां दातुम् आगच्छन्ति, तेषां प्रति अस्माकं सम्मानः अस्ति। सेवाः उच्चस्तरे स्थापनीयाः। जनसेवा सर्वोच्चा प्राथमिकता अस्ति। अत एव प्रदेशजनैः वयं निर्वाचिताः।

## स्वस्व- दायित्वं सर्वेषां, किन्तु अतिव्याप्तिः (ओवरलैपिङ्ग) घातकाः- विक्रमादित्यसिंहः

अग्रे विक्रमादित्यसिंहः अवदत्- “वयं केनचित् सह संघर्षं न इच्छामः। सर्वेषां स्वस्वं दायित्वं निश्चितम्; किन्तु यदा तत्र अतिव्याप्तिः आरभ्यते, तदा सा कठिना भवति। तस्मिन् सन्दर्भे एव मया मम वक्तव्यं कृतम्। तस्मिन् च अहं दृढः अस्मि। हिमाचलप्रदेशस्य जनानां हितेषु अहं निरन्तरं स्वरम् उन्नेष्यामि- आसनस्थोऽहं वा न वा। वयं सर्वेषां आदरं कुर्मः; किन्तु कश्चिद् अधिकारी स्वं शासकं कर्तुं प्रयतते चेत्, तर्हि वयं तं स्मारयिष्यामः। एतत् अस्माकं दायित्वम्, अस्मात् न निवर्तिष्यामः।”
मन्त्री अनिरुद्धसिंहस्य, जगत नेगीवर्यस्य च वक्तव्ययोः विषये सः अवदत्- “अहं वयसा, गौरवेण च सर्वेभ्यः कनिष्ठ अस्मि। मम कृते सर्वे सम्माननीयाः। अहं विवादं न इच्छामि। सर्वेभ्यः शुभगुणान् शिक्षितुम् इच्छामि; किन्तु सिद्धान्तैः संस्कारैश्च सह किमपि **सहमतिं** न करिष्यामः, यतः तैः एव व्यक्तेः परिचयः भवति। प्रदेशहिते या चिन्ता, तस्या विषये आजीवनं सिद्धान्तैः सह किमपि समाधानम् न करिष्यामः।”

## प्रदेशजनानां समर्थनं, प्रेम, आशीर्वादः एव महती सुरक्षा

आईपीएस- अधिकारी- सङ्घस्य वक्तव्ये सः अवदत्- “मम पूर्वमेव कश्चिद् आईपीएस अधिकारी सुरक्षा-व्यवस्थायां न अस्ति। हिमाचलप्रदेशस्य जनाः दुर्बलाः न सन्ति यत् तेषां कस्यचित् विशेष-सुरक्षायाः आवश्यकता स्यात्। अहं पुलिससुरक्षां विना अपि वसामि; मम पार्श्वे प्रदेशजनानां समर्थनं, प्रेम, आशीर्वादः अस्ति। सैव महती सुरक्षा। ये (आईपीएस अधिकारिणः) सुरक्षा प्रत्याहर्तुम् इच्छन्ति, ते कुर्वन्तु।”
यत्र उपमुख्यमन्त्रिणां मञ्चे एषः विषयः उद्घाटितः, सः लघुमञ्चः एव इति अपि सः अवदत्। सः उक्तवान्- “अहं अस्य विषयस्य अतितूलनं न इच्छामि; तथापि यदि मुख्यमन्त्री पृच्छेत्, तर्हि मम स्थितिः स्पष्टा अस्ति। यत्र यत्र मया वक्तव्यम्, तत्र तत्र कथयिष्ये। प्रदेशहितानि मम कृते सर्वोपरि आसन्, सन्ति च, सदा भविष्यन्ति। एतस्मिन् विषये सरकारे वा उच्चनेतृत्वे वा यत्र आवश्यकं तत्र वक्तव्यम्। मम महती उत्तरदायित्वं हिमाचलप्रदेशस्य पञ्चसप्ततिलक्ष-जनानां प्रति अस्ति। यत्र हिमाचलजनहितेषु **सहमतिः** दृश्यते, तत्र विक्रमादित्यसिंहः निरन्तरं स्वरम् उन्नेष्यति।”

## नीरजभारती विक्रमादित्यसिंहस्य समर्थनार्थं पोस्ट प्रकाशितवान्

तदनन्तरं कृषिमन्त्री चन्द्रकुमारस्य पुत्रः, पूर्वः मुख्य-संसदीय- सचिवः नीरजभारती अपि विक्रमादित्यसिंहस्य वक्तव्यस्य समर्थनार्थं पोस्ट प्रकाशितवान्। सः अलिखत्- “बाह्यप्रदेशेभ्यः आगताः केचन आईएएस-आईपीएस अधिकारिणः हिमाचलप्रदेशे मन्त्रीणां विधायकानां च दूरभाषं अपि न गृह्णन्ति; दूरभाषपटले नाम दृष्ट्वा दूरभाषं स्थापयन्ति।” पूर्वं बुधवासरे अन्यस्मिन् पोस्ट मध्ये सः अलिखत्- “सर्वे न, किन्तु ६०–७० प्रतिशतं बाह्याधिकारिणां हिमाचलप्रदेशस्य वा हिमाचलीयानां हितैः सह किमपि सम्बन्धं न वहन्ति। काङ्ग्रेस्याः स्मरणीयम्। यदा विपक्षे आसन्, तदा एकस्मिन् उच्च- आईपीएस- अधिकरिणि पुलिस-भर्ती-विषयकः आरोपः कृतः आसीत्; यदा कदाचित् काङ्ग्रेस वा तस्य अग्रसंस्थाः विधानसभां पुरतः आन्दोलनं कुर्वन्ति स्म, तदा स एव उच्च-आईपीएस अधिकारी काङ्ग्रेस्यां **यष्टिप्रहारं** अपि कारितवान्; किन्तु काङ्ग्रेस-सर्वकारस्य आगमने सः सुखेन कार्यकालं समाप्य वैभवेण निवृत्तः अभवत्। न ज्ञायते, सर्वकार-निर्माणानन्तरं तस्य अधिकारिणः विरुद्धं काङ्ग्रेसिणां विरोधः कुत्र गतः।”

## विक्रमादित्यसिंहस्य वक्तव्यम् अनावश्यकं हानिकरं च- धर्माणी

प्रदेश- सर्वकारस्य मन्त्रिणां मध्ये वाक्ययुद्धं इदानीं स्पष्टतया दृश्यते। अधुना तन्त्रशिक्षामन्त्री राजेश धर्माणी विक्रमादित्यसिंहं प्रति उपदेशं दत्त्वा तस्य वक्तव्यम् अनावश्यकं हानिकरं च इति अवदत्। धर्माणी अवदत्- लोकतन्त्रस्य चतुर्षु स्तम्भेषु कार्यपालिकायाः विशेषं महत्त्वम् अस्ति। अखिल- भारतीय- सेवाः अन्तर्गतं अधिकारिणां नियुक्तिः भारतसर्वकारेण क्रियते, प्रदेशस्य विकासे च तेषां महती भूमिका अस्ति। यदि विक्रमादित्यसिंहस्य कस्यचित् अधिकारिणा सह समस्या आसीत्, तर्हि तद् माध्यमेषु प्रचारयितुं विना मन्त्रिमण्डले- समीक्षायां स्थापयितव्यम् आसीत्। मुख्यमन्त्रिणा सह प्रत्यक्षसंवादः कर्तव्यः आसीत्। सार्वजनिकमञ्चेषु एतादृशैः वक्तव्यैः राष्ट्रव्यापी दूषितः सन्देशः गच्छति। धर्माणी चिन्तां व्यक्तवान्- हिमाचलप्रदेशस्य अपि बहवः प्रतिभावन्तः अधिकारिणः अन्येषु राज्येषु सेवां ददति। यदि हिमाचले बाह्यराज्यीय-अधिकारीणां विषये प्रश्नाः स्थाप्यन्ते, तर्हि अन्येषु राज्येषु नियुक्तानां हिमाचलीय-अधिकारीणां प्रति अपि अनावश्यकक्लेशः असहजता च उत्पद्येत्। सः स्मारयामास यत् हिमाचलः अनेक-विकास-कार्येषु अन्येषु राज्येषु अपि आश्रितः भवति; अतः एतादृशं वक्तव्यं पारस्परिक-सम्बन्धान् प्रभावितुं शक्नोति।

# HPCM - केन्द्रीयवित्तमन्त्री महोदयां मिलितवान् मुख्यमंत्री सुक्खुः, हिमाचलस्य कृते वित्तीयसहायतायाः अनुरोधं कृतवान्



हिमसंस्कृतवार्ताः- नवदेहली। मुख्यमन्त्री सुखविंद्रसिंहसुक्खूमहोदयः गुरुवासरे नवदिल्ल्यां केन्द्रीयवित्तमन्त्री निर्मला सीतारमण महोदयां शिष्टाचारमेलनं कृतवान्। अस्मिन् उपवेशने मुख्यमन्त्री केन्द्रीयवित्तमंत्रिणा सह राज्यस्य वित्तीयस्थितेः चर्चां कृतवान्। हिमाचलप्रदेशस्य आर्थिकस्थितिं सुदृढां कर्तुं केन्द्रसर्वकारात् उदारसहयोगस्य आग्रहं कृतवान्।मुख्यमन्त्री सुखविंद्रसिंहसुक्खूमहोदयः केन्द्रीयमन्त्रिणं षोडशाय (16th) वित्तायोगाय प्रस्तुतस्य ज्ञापनस्य तथा च अतिरिक्तज्ञापनस्य विषये सूचितवान्। सः 'राजस्व-हानि-अनुदानम्' न्यूनतम् प्रतिवर्षं १०,००० कोटिरूप्यकाणि (10,000 Cr) निर्धारितं कर्तुं आग्रहं कृतवान्। सः षोडशवित्तायोगस्य 'अवार्ड' कालखण्डे राज्याणां राजस्व-व्यय-अनुमानानां यथार्थवादि-आकलनस्य उपरि बलं दत्तवान्।मुख्यमन्त्री पर्वतीयराज्यानां कृते पृथक् हरितकोषं ('ग्रीन फण्ड') स्थापयितुं पक्षं कुर्वन् उक्तवान् यत् अस्मिन् प्रतिवर्षं ५०,००० कोटिरूप्यकाणां प्रावधानं सुनिश्चितं भवेत्। सः अवदत् यत् पर्वतीयराज्यानि देशस्य 'ग्रीन फ्रंटियर्स' इति सन्ति तथा च पारिस्थितिकीतन्त्रस्य सुदृढीकरणे तेषां महत्त्वपूर्णा भूमिका अस्ति। सः 'होरिजेंटल डिवोल्यूशन' इत्यस्य कृते राज्येन प्रस्तावितस्य संशोधितसूत्रस्य विषयेऽपि सूचितवान्, येन वनानां वन- आधारित-पारिस्थितिकीनां च मानदण्डानां विशेषं ध्यानं स्थापयितुं अभ्यर्थना कृता। सः आग्रहं कृतवान् यत् हिमाच्छादित-शीत-मरुभूमि-क्षेत्राणि अपि सघन-मध्यम-वनानां श्रेणीषु सम्मिलितानि भवेयुः। मुख्यमन्त्री १५तम-वित्तायोगेन विकसितस्य 'आपदा- संकट- सूचकांकस्य' (DRI) पुनर्परिभाषायाः आवश्यकतायां बलं दत्तवान्। सः उक्तवान् यत् हिमालयक्षेत्राणां तुलना देशस्य अन्यैः क्षेत्रैः सह न कर्तुं शक्यते। प्राकृतिकविपत्तीनां सम्मुखीकरणं कृत्वा अपि राज्येन आपदा-निवारणाय पर्याप्त-संसाधनानि न प्राप्तानि। सः विशिष्टसंकेतकान् दृष्ट्वा पर्वतीयराज्यानां कृते पृथक् DRI तथा च पृथक् आवंटनस्य (Allocation) अभ्यर्थनां कृतवान्।
मुख्यमन्त्री सुखविंद्रसिंहसुक्खु महोदयः केन्द्रीयवित्तमन्त्रिणं राज्यस्य कृते अतिरिक्तसहयोगं दातुं प्रार्थितवान्। राजस्व-हानि-अनुदाने विगतवर्षेषु जातस्य न्यूनतायाः कारणेन राज्यस्य वित्तीयक्षमतायां प्रतिकूलप्रभावं निर्दिशन् सः जीएसडीपी इत्यस्य अतिरिक्तं २ प्रतिशतम् ऋणं स्वीकर्तुम् अनुमतिम् अयाचत्। अस्मिन् अवसरे मुख्यमन्त्रिणः प्रधानपरामर्शदाता रामसुभगसिंहः, वित्तसचिवः देवेशकुमारः, मुख्यमन्त्रिणः सचिवः राकेशकंवरः, राज्यसर्वकारस्य अन्ये वरिष्ठाधिकारिणः उपस्थिताः आसन्।

# भाजपा-दलेन पर्यटनम् उपेक्षितम्, अस्माभिः केन्द्रं (हब) निर्मितम्; व्यवस्थापरिवर्तनेन प्रदेशः विकसितः भवति- मुख्यमन्त्री



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे पर्यटनक्षेत्राय नवीनं परिचयं दातुं वर्तमानराज्यसर्वकारेण एका समग्रा दूरदर्शिनी च उद्यमः आरब्धः। मुख्यमन्त्री सुखविंद्रसिंहसुक्खू महोदयस्य नेतृत्वे राज्यसर्वकारः 'व्यवस्थापरिवर्तनस्य' अवधारणां साकारं कुर्वन् पर्यटनं केवलं मनोरञ्जनस्य साधनं न, अपि तु पर्यावरणसंरक्षणेन, स्थानीयजीविकोपार्जनेन, सतत- आर्थिकविकासेन च सह योजयति।

मुख्यमन्त्री उक्तवान् यत् पूर्वतन- भाजपा-सर्वकारस्य कार्यकालखण्डे हिमाचले पर्यटनस्य अपारसम्भावनाः ज्ञात्वा अपि उपेक्षिताः। सत्तायां स्थिता भाजपा न तु कापि कठिना पर्यटननीतिं निर्मातुं शक्ता, न च प्राकृतिकसंसाधनानां वैज्ञानिक- सतत- उपयोगस्य दिशि कोऽपि गम्भीरः प्रयासः कृतः। विशेषतः राज्यस्य विशालानि जलसंसाधनानि भाजपा-सर्वकाराणाम् उदासीनतायाः दूरदृष्टेः अभावात् च उपेक्षितानि आसन्।वर्तमाना कांग्रेससर्वकारः एताः विफलताः स्वीकृत्य ताभ्यः शिक्षां च प्राप्य जलपर्यटनं तथा ईकोपर्यटनं विकासस्य प्रमुखस्तम्भरूपेण अङ्गीकृतवान्। एतत् सूचयति यत् यत् कार्यं भाजपा बहुवर्षेषु कर्तुं न शक्तम्, तत् वर्तमानसर्वकारेण स्पष्टनीत्या इच्छाशक्त्या च अग्रे नीतम्। पौंग-बन्धसरोवरः, यः अन्ताराष्ट्रीय- महत्त्वपूर्णः 'रामसर वेटलैण्ड' इति क्षेत्रम् अस्ति, सः भाजपाशासने न तु संरक्षणदृष्ट्या प्राथमिकतायाम् आसीत्, न च पर्यटनविकासस्य मानचित्रे। कांग्रेससर्वकारेण पौंगबन्धं भारतस्य प्रमुख- पक्षीदर्शन- स्थलेषु विकसितुं दृढ़प्रयासः कृतः। न केवलं एतत्, अपि तु गोविन्दसागर-सरोवरः (बिलासपुरम्) तत्तापानी सदृशानि स्थलानि च दशकानि यावत् भाजपा-सर्वकारस्य सञ्चिकासु (files) एव सीमितानि आसन्। न आधारभूतसंरचना विकसिता, न च स्थानीययुवानः योजिताः।

## जल-पर्यटन-केन्द्राणां विकासः

कांग्रेससर्वकारः सत्तां प्राप्यैव जलाशयक्षेत्राणि आधुनिक- जलपर्यटन-केन्द्ररूपेण विकसितवान्। एतेन स्पष्टं जातं यत् विकासस्य मार्गः इच्छाशक्त्या सिध्यति, न तु केवलं घोषणाभिः। अद्य एतेषु क्षेत्रेषु शिकारा, स्पीड-बोटिंग, हाउसबोट, जेट-स्की, वॉटर-स्कूटर इत्यादयः क्रीडाः न केवलं पर्यटनं वर्धयन्ति, अपि तु स्थानीय-अर्थव्यवस्थां अपि सुदृढां कुर्वन्ति, यत् भाजपाशासने न सम्भवति स्म। कांग्रेस-सर्वकारस्य ईको-पर्यटन-नीत्याः अन्तर्गतं विभिन्न- वनमण्डलेषु ७७ नूतनानि ईको- पर्यटन- स्थलानि विकसितानि क्रियन्ते। सर्वकारेण 'मुख्यमन्त्री पर्यटन स्टार्टअप योजना' आरब्धा, येन होम-स्टे, उपाहारगृहाणि (hotels), फूडवैन इत्यादि- उद्यमेभ्यः प्रोत्साहनं दीयते।

## पर्यटनं सतत-विकासस्य सुदृढ-प्रतिमानम्

मुख्यमन्त्री सुक्खू महोदयस्य अनुसारं, अद्य हिमाचले यत् परिवर्तनं दृश्यते तत् तदा एव सम्भवं अभवत् यदा वर्तमानसर्वकारेण पूर्वसर्वकारस्य निष्क्रियतायाः विफलनीतीनां च त्यागं कृत्वा भिन्नः मार्गः चितः। अद्य पर्यटनं केवलं राजस्वस्य साधनं नास्ति, अपि तु पर्यावरणसंरक्षणस्य, सामाजिक- सशक्तीकरणस्य, सततविकासस्य च सुदृढं प्रतिमानं (Model) भवति। एतत् परिवर्तनं प्रमाणं अस्ति यत् यदा सर्वकारः निष्कपट-भावेन स्पष्ट- दृष्ट्या च कार्यं करोति, तदा व्यवस्थापरिवर्तनं केवलं घोषवाक्यं न, अपि तु साकारा वास्तविकता भवति।

# भुन्तरे निज आतिथ्यशालायां पुलिसेन आकस्मिकम् अन्वेषणं कृतम्, १०४ ग्राम '(चिट्टा') मादकद्रव्यं गृहीतम्, अन्वेषणे पुलिसदलं प्रवृत्तम्।



**हिमसंस्कृतवार्ताः- कुल्लू ।**(चिट्टा) मादकद्रव्यं तस्कराणां विरुद्धं पुलिसः तीव्रकार्यप्रवृत्तौ वर्तते। भुन्तरे कुल्लू-पुलिसेन चिट्टाद्रव्यस्य महत्भंडारः गृहीतः। पुलिसेन निज आतिथ्यशालायाम् आकस्मिकम् अन्वेषणं कृत्वा द्वौ युवानौ १०४ ग्राम चिट्टाद्रव्येण सह अभिगृहीतौ। आरोप्ययोः एकः कुल्लूनिवासी, अपरः पञ्जाबनिवासी अस्ति। आरोप्ययोः विरुद्धं एनडीपीएस- अधिनियमस्य अन्तर्गतं प्राथमिकी पञ्जीकृता, पुलिसः अन्वेषणे प्रवृत्ता।चिट्टा-तस्कराणां विषये पुलिसायै सूचना प्राप्ता आसीत्। तदनन्तरं भुन्तर पुलिसदलेन बुधवासरस्य रात्रौ छोटा-भूईनस्थ एकस्मिन् आतिथ्यशालायां आकस्मिकम् अन्वेषणं कृतम्। कक्षस्य अन्वेषणे आरोपीजनयोः- निखिल शर्मा (वयः ३२ वर्षाणि), ग्रामः पारला भुन्तर, डाकघरं तथा तहसीलः भुन्तर, कुल्लू-निवासी शिवकुमारः (वयः ३२ वर्षाणि), गृहसंख्या ७५, मंगली निच्ची, डाकगृहं रामगढ़, तहसीलः तथा जनपदः लुधियाना, पञ्जाबनिवासी एतयोः पार्श्वे १०४ ग्राम चिट्टा, २१,२०० रूप्यकाणि अपि ग्रहीतानि। ततः पुलिसेन उभौ अपि बंदीकृतौ।निखिलस्य विरुद्धं एनडीपीएस- अधिनियमस्य अन्तर्गतं पूर्वमेव द्वौ वादौ प्रचलितौ स्तः, पञ्जाब-निवासिनस्य विरुद्धं च एकः वादः प्रचलति। १०४ ग्राम चिट्टा अस्मिन् वर्षे अद्यावधिपर्यन्तं गृहीतः सर्वाधिकः महत्भंडार अस्ति। गतदिनेष्वपि कुल्लू-पुलिसेन भुन्तरे ७२ ग्राम चिट्टा गृहीतम् आसीत्। कुल्लू- जनपदस्य पुलिस- अधीक्षकः मदनलालकौशलः अवदत्- आरोप्यौ न्यायालये उपस्थाप्य पुलिस-रिमाण्डः प्राप्यते। आरोप्ययोः पृच्छा प्रचलति; चिट्टाया स्रोतः, आपूर्ति- श्रृङ्खला च अन्वेष्यते। तस्कराणां सम्पत्तेः अपि परीक्षणं भविष्यति। नशाविरुद्धं पुलिसस्य कार्यवाही निरन्तरं प्रवर्तते।

# Bijli Mahadev Ropeway- बिजली- महादेव- रज्जुमार्ग- प्रकरणे सर्वकाराय सप्ताहात्रयस्य समयः

### राष्ट्रियहरितप्राधिकरणेन (एनजीटी) प्रत्युत्तरं दातुं कालः दत्तः, रज्जुमार्गार्थं ६७ हरितवृक्षाणां छेदनस्य प्रकरणम्

हिमसंस्कृतवार्ताः- कुल्लूः।बिजली- महादेव- रज्जुमार्ग- परियोजनायाः प्रकरणे राज्यसर्वकारः सम्बन्धितविभागाः च अद्यापि राष्ट्रियहरितप्राधिकरणाय (एनजीटी) पूर्णं प्रत्युत्तरं दातुं समर्थाः नाभवन्। मङ्गलवासरे नवदिल्ल्यां राष्ट्रियहरितप्राधिकरणस्य प्रधानपीठस्य समक्षं जाते श्रवणे हिमाचलप्रदेश- सर्वकारस्य पक्षतः महाधिवक्त्रा (Advocate General) प्रत्युत्तरं दातुं अतिरिक्तं सप्ताहात्रयस्य समयः याचितः, यद् राष्ट्रियहरितप्राधिकरणेन स्वीकृतम्।

राष्ट्रियहरितप्राधिकरणेन पूर्वं ९ दिसम्बर २०२५ दिनाङ्के जाते श्रवणे प्रकरणेन सम्बद्धानां महत्त्वपूर्णानां पर्यावरणीय- विषयाणाम् उपरि सर्वकारात् विस्तृतं प्रत्युत्तरं याचितम् आसीत्। तस्मिन् समये अपि सर्वकारेण सप्ताहात्रयस्य कालः स्वीकृतः आसीत्, परन्तु निश्चितसमये प्रत्युत्तरं दातुं न शक्तम्। एतत् प्रकरणं 'कायल' क्षेत्रे ६७ हरितवृक्षाणां छेदनात् परं राष्ट्रिय- हरित- प्राधिकरणस्य समक्षं प्राप्तम्। बिजली- महादेव- मन्दिर- समित्या, अन्यैः याचिकाकर्तृभिः च रज्जुमार्ग- परियोजनायां पर्यावरणीय-नियमानां उल्लङ्घनस्य आरोपः कृतः अस्ति।

# Dalai Lama- दलाई लामा महोदयेन तिब्बतदेशं प्रतिनिवर्तितुं दृढेच्छा प्रकटीकृता



**हिमसंस्कृतवार्ताः- धर्मशाला।** तिब्बती- धर्मगुरुः दलाईलामा महोदयः दक्षिणभारते 'द्रेपुुंग गोमांग' मठे आयोजितस्य सार्वजनिक- समारोहस्य अवसरे एकेन तिब्बती- श्रद्धालुना सह सम्भाषणं कुर्वन् अवदत् यत् सः निश्चितरूपेण तिब्बत-देशं प्रतिगमिष्यति। 'गादेन फोद्रांग' कार्यालयेन गुरुवासरे प्रसारितस्य सार्वजनिक- दर्शनस्य एकस्य संक्षिप्त- दृश्य- श्रव्यखण्डस्य (Video) अनुसारं, एकेन तिब्बती- श्रद्धालुना दलाई लामा महोदयस्य पुरतः तस्य जीवनस्य कार्याणां च उपरि आधारितं एकं स्तुतिगीतं प्रस्तुतम्। अस्मिन् अवसरे परमपावनः स्पष्टतया अवदत् यत् सः अवश्यमेव तिब्बत-देशं प्रतिगमिष्यति। सः एतदपि उक्तवान् यत् सम्भवतः चीन- देशस्य जनता तस्य स्वागतं कुर्यात्। सः टिप्पणीं कृतवान् यत् यदि तिब्बती-जनाः स्वतन्त्रतायाः स्थाने 'स्वायत्तता' (Autonomy) इति विषये वदेयुः, तर्हि चीन-पक्षः उत्तरदायित्वं स्वीकरिष्यति सन्तोषं च प्रकटयिष्यति।

गुरुवासरे आयोजितस्य अस्य सार्वजनिक-दर्शनस्य समये दलाई लामा महोदयः प्रायः ३९० श्रद्धालुभ्यः दर्शनं आशीर्वादं च दत्तवान्। 'द्रेपुंग गोमांग' मठस्य कोषाध्यक्षः 'गेशे मोनलाम ग्यात्सो' महोदयः सूचितवान् यत् अस्मिन् अवसरे आयोजितस्य शीतकालीन-महासम्मेलनस्य त्रयाणां प्रमुखाणां तिब्बती- मठानाम् अन्येषां मठानां च प्रायः एकसहस्रं भिक्षवः विद्यार्थिनः च सम्मिलिताः अभवन्। अस्मिन् कार्यक्रमे भारतीय- बौद्ध-दर्शनेन सम्बद्धानां ग्रन्थानां उपरि शास्त्रार्थः (वाद- विवादः) विदुषां चर्चा च अभवत्। 'गादेन फोद्रांग' न्यासेन (Trust) दत्तसूचनानुसारं, २१ जनवरी दिनाङ्के कर्नाटकस्य मुण्डगोड-स्थिते 'गादेन' मठ-परिसरे दलाई लामा महोदयस्य दीर्घायुषे एका विशेषप्रार्थनासभा आयोजयिष्यते, यत्र सः मुख्यरूपेण उपस्थितः भविष्यति।

# पाणिनि- विश्वविद्यालये बौद्धिकसत्रायोजनम्-"शिक्षकाः राष्ट्रचेतनायाः शिल्पिनः सन्ति"- मान्याः सुरेशसोनीवर्याः



महर्षिपाणिनि- संस्कृत- वैदिक- विश्वविद्यालये शिक्षकाः राष्ट्रचेतनायाः शिल्पिनः तथा भविष्यस्य संस्कारकर्तारः इति विषयमाधारीकृत्य विशेषबौद्धिकसत्रम् आयोजितम्। अस्य कार्यक्रमस्य मुख्यवक्ता राष्ट्रीय- स्वयंसेवकसंघस्य अखिलभारतीय- कार्यकारिणीमण्डलस्य सदस्यः पूर्वसरकार्यवाहः सुरेशसोनीवर्यः उपस्थितः आसीत्। कार्यक्रमस्य प्रारम्भे कुलगुरुः प्रो. शिवशङ्करमिश्रः कुलसचिवः प्रो. दिलीप सोनी च महोदयस्य स्वागतं कृत्वा विश्वविद्यालयस्य पाणिनीयाशोधपत्रिकां प्रदत्तवन्तौ। विमर्शकक्षे आयोजिते सत्रे सम्बोधनं कुर्वन् सुरेश सोनी अवदत् यत् राष्ट्रं केवलं भूमिसीमा वा प्रशासनिक-व्यवस्था न, अपि तद् सजीवचेतना अस्ति। तस्याः निर्माणं व्यक्तेः संस्कारैर्भूत्वा समाजस्य चरित्रे भवति। सः उक्तवान् यत् विश्वविद्यालयाः केवलं उपाधिवितरणकेन्द्राणि न स्युः, अपि तु प्रयोगशालारूपेण विकसिताः स्युः, यत्र राष्ट्रकर्तव्यबोधः विकासं प्राप्नुयात्, भावी कर्तॄणां च निर्माणं स्यात्। कर्तव्यबोधेनैव राष्ट्रबोधस्य विकासः सम्भवति इति सः स्पष्टतया प्रतिपादितवान्। भारतीय- सांस्कृतिक- परम्परायाः उल्लेखं कृत्वा सः अवदत् यत् अधिकारात् पूर्वं कर्तव्यस्य बोधः अत्यावश्यकः। यदा शिक्षकः स्वयम् अनुशासनं, नैतिकतां, सदाचारं च आचरणेन दर्शयति, तदा एव छात्रेषु राष्ट्रबोधः सामाजिक-विकासश्च सम्भवति।सम्प्रति विश्वविद्यालयाः केवलं रोजगारोपयोगि-कौशलपर्यन्तं सीमिताः न स्युः, अपि तु छात्रेषु सामाजिक-समरसता, सांस्कृतिकचेतना, नैतिक- मूल्यानि च विकसितानि कर्तव्यानि इति सः उक्तवान्। संस्कारविहीनं ज्ञानं समाजं दिशां दातुं न शक्नोति इत्यपि तेन निर्दिष्टम्।कुलगुरुः प्रो. शिवशङ्करमिश्रः उक्तवान् यत् सोनीमहोदयस्य व्याख्यानं सम्बोधनमात्रं न अपि तु राष्ट्र- समाज- शिक्षायाः अन्तर्सम्बन्धी- विषयकमासीत्, यत् शिक्षकान् चरित्रनिर्माणे मूल्यानां संवर्धने च नवोर्जां दास्यति। कार्यक्रमस्य समापनकाले कुलसचिवः प्रो.दिलीपसोनीमहोदयः सर्वेषां अतिथीनाम् आभारं प्रकटितवान्। अस्मिन् अवसरे विश्वविद्यालयस्य वरिष्ठाः अधिकारिणः, प्राध्यापकाः, कर्मचारिणश्च उपस्थिताः आसन्।

# विश्व-पुस्तक-मेलके साहित्याकादेम्याः बहुभाषीयः कथा-पाठः सम्पन्नः



ऐषमो विश्व-पुस्तक-मेलकस्य अवसरे साहित्याकादेम्या बुधवासरे सायंकाले बहुभाषीय-कथा-पाठ-कार्यक्रमः सफलतया आयोजितः। अस्मिन् कार्यक्रमे भारतस्य विभिन्नासु तिसृषु भाषासु प्रख्याताः कथाकाराः स्व-स्व-भाषाभिः निज-निज-कथानां प्रभावपूर्णं कथा-पाठ-प्रस्तवनम् अकुर्वन्।

कार्यक्रममिमं प्रख्यातः ओडिया-लेखकः अमरेशः खड़ुआ-वर्यः अध्यक्षितवान्। अत्रावसरे खड़ुआ-वर्येण कथितं यत्—कथा-पाठः साहित्यस्य तदङ्गं वर्तते येन लेखकाः साक्षात् पाठकैः सह संयोजिताः भवन्ति। कथा सरलः, लोकप्रियः, प्रभावशाली च माध्यमः अस्ति येन जनानां मानसेषु नैतिकतायाः, जीवन-मूल्यानां च आधानं सुगमतया कर्तुं शक्यते। एषः बहुभाषीयः मञ्चः भारतीय-साहित्यस्य भाषिक-वैविध्यं प्रकाशयन् राष्ट्रीय-एकतायाः सुदृढीकरणम् अपि करोति। अस्मिन् कार्यक्रमे संस्कृत-भाषायाः कथा-पाठः विशेषाकर्षणरूपेण सिद्धः। अस्मिन् अवसरे संस्कृत-साहित्यकारः डॉ. युवराज भट्टराई "तस्य परिचयः" इति शीर्षकीयां स्वीयामाधुनिकीं संस्कृत-कथां प्रभावपूर्णतया प्रास्तौत्। तस्य कथा-पाठे भाषायाः शुद्धता, भावनानां गाम्भीर्यम्, कथ्यस्य संवेदनशीलता, भाषीय-प्रवाहः च स्पष्टतया प्रकटिताः अभवन्। श्रोतृवर्गः सम्पूर्ण-मनोयोगेन कथां श्रुत्वा तस्य प्रस्तुतिं मुक्तकण्ठेन प्राशंसत्।अत्रेदमपि विशेषतया उल्लेखनीयं यत्—डॉ. युवराज भट्टराई स्वीय-वक्तव्ये कथायाः ऐतिहासिक-पृष्ठभूमिं विवृण्वन् अवदत् यत् भारतीय-समाजे पुरातनकालादेव कथा-प्रकथनस्य समृद्धा परम्परा अस्ति। रामायण-कथा, महाभारत-कथा, भागवत-सत्यनारायण-कथा चेत्यादयः भक्ति-कथाः अस्माकं जीवनस्य आध्यात्मिक-नैतिक-सांस्कृतिक-विकासे अत्यन्तं महत्त्वपूर्णाः सन्ति।बालकानां सन्दर्भे पञ्चतन्त्र-हितोपदेश-वेतालपञ्चविंशतिका-सन्निभाः कथाः शिक्षाप्रदाः, आनन्ददायिन्यः मनोरञ्जनपूर्णाश्च सन्ति। एतासां परम्पराणां स्मरणं कृत्वा तेन अधुनातन-सन्दर्भे अपि कथायाः अपरिहार्य-महत्त्वं प्रकाशितम्। कथाः अद्यापि समाजस्य यथार्थं, संवेदनां च प्रभावपूर्णरूपेण अभिव्यक्तीकर्तुं समर्थाः सन्ति—इति तेन प्रतिपादितम्।डॉ. युवराज भट्टराई-वर्यस्य प्रस्तुतेः माध्यमेन एतत् सिद्धमभवत् यत् संस्कृत-भाषा अद्यापि समकालिक-विषयान् जीवनस्य यथार्थं च सशक्ततया अभिव्यञ्जयितुं पूर्णतया समर्था अस्ति। तस्य कथा-पाठः कार्यक्रमस्य प्रमुखेषु आकर्षणेषु एकतमः अभवत्।बहुभाषीय-कथा-पाठ-कार्यक्रमे अन्यासु भाषासु अपि कथा-पाठः सम्पन्नः। तेषु कथा-पाठकेषु—ओडिया-भाषायां डॉ. एनी रायः, तेलुगु-भाषायां डॉ. दत्तेय अट्टमः, संस्कृत-भाषायां डॉ. युवराज भट्टराई—
स्व-स्व-कथाः प्रस्तुतवन्तः। विविध-भाषिक-प्रस्तुतिभिः कार्यक्रमे भाषिक-विविधतायां निहिता राष्ट्रिया एकता स्पष्टतया अनुभूता।साहित्याकादेम्या आयोजितः अयं कार्यक्रमः विश्व-पुस्तक-मेलायां साहित्यिक-गतिविधीनां महत्त्वपूर्णः प्रकल्पः सिद्धः, यः भारतीय-साहित्यस्य बहुभाषीय-चेतनायाः सशक्तं सन्देशं समाजाय प्रायच्छत्।

## "लौकिकन्यायकोशः"
## "भिल्लीचन्दनन्यायः"

मलयपर्वतस्य उपरि चन्दनतरवः बाहुल्येन भवन्ति। सततं तत्र चन्दनं लभ्यते। तस्य चन्दनस्य कियत् मूल्यम् अन्यत्र भवति इति तत्र स्थिताः भिल्लमहिलाः न जानन्ति अतः ताः पाकार्थम् इन्धनम् इव तस्य उपयोगं कुर्वन्ति। अति परिचयतः अपमान एव भवतीति अनेन बोध्यते। यथा-

**अतिपरिचयादवज्ञा संततगमनादनादरो भवति।**
**मलये भिल्लपुरन्ध्री चन्दनतरुकाष्ठमिन्धनं करोति।।**

{शार्ङ्गधरपद्धतिः ८३}

**डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**



## वार्तासंवादः

हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य एका विनोदमयी वार्ता मया श्रुता। एकया युवत्या कृत्रिम-बुद्ध्या (AI) रचितं चित्रं प्रदर्श्य स्वमातुः परिहासः कृतः। "मम नूतनः प्रेमी एषः" इति उक्त्वा तया माता वञ्चिता। तत् चलच्चित्रम् इदानीं बहुभिः दृष्टम् अस्ति।

**नन्दिनी-** सत्यं, सा वार्ता तु हास्यपूर्णा। किन्तु अमेरिका-देशस्य डालस-नगरे अन्या विचित्रा घटना दृष्टा। तत्र एकेन पुरुषेण बृहत्-आपणे अश्व-आरोहणं कृतम्।

**काव्या-** किम् उच्यते? आपणस्य अन्तः अश्वः नीतः वा?

**नन्दिनी-** आम्। वस्तूनां पङ्क्तीनां मध्ये अश्वः चालितः। तत् दृष्ट्वा सामाजिक-माध्यमेषु जनैः महती चर्चा आरब्धा।

**नन्दिनी-** अश्वस्य सा घटना तु विस्मयकरी। इदानीं जापान-देशस्य एका वार्ता श्रूयताम्। तत्र एकया भारतीय-शिक्षिकया कार्य-संस्कृतिः प्रशंसिता।

**काव्या-** किम् उच्यते? "तत्र अत्यधिकं कार्यं भवति" इति प्रायशः श्रुतं मया।

नन्दिनी- न तथा। "अधिक-समय-कार्यं बलात् न कारितं, तस्य धनं च दीयते" इति तया कथितम्। एतत् ज्ञात्वा जनाः चकिताः।

**नन्दिनी-** जापान-देशस्य नियमः तु श्लाघनीयः। परं कानाडा-देशे वसन्त्या एकया भारतीय-महिलाया "पुनः स्वदेशं गन्तुम् इष्यते" इति कथितम्।

**काव्या-** कुतः? किं तत्र धनस्य अभावः जातः?

**नन्दिनी-** न हि। "अहं तत्र एकाकिनी जाता, बान्धवेभ्यः विच्छिन्ना" इति तया अनुभूतम्। विदेशस्य मोहं त्यक्त्वा "स्वदेशे एव सुखम्" इति तया ज्ञातम्।

**काव्या-** सत्यम्। "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी" इति वचनं मया स्मृतम्। अस्तु, अद्यतन-समयः समाप्तः।

नन्दिनी- आम्। श्वः पुनः नूतन-वार्ताभिः सह आगमिष्यावः। तावत् शुभं भवतु। नमो वः।

# KKSU Ramtek - कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालये मकरसंक्रान्तिपर्वणि सूर्ययागः सम्यक् सम्पन्नः



**हिमसंस्कृतवार्ताः - डॉ रेणुका बोकारे, नागपुरम्।** “यज्ञो वै श्रेष्ठतमं कर्म” इति वेदेषु वर्णितेषु चतुर्विधेषु कर्मसु यज्ञस्य श्रेष्ठतमत्वं प्रतिपादितम् अस्ति। यदा सूर्यः धनुराशेः निर्गत्य मकरराशिं प्रविशति तदा सः क्षणः मकरसंक्रान्तिरिति कथ्यते। एषा संक्रान्तिः सामान्यतः जनवरी-मासस्य चतुर्दशे वा पञ्चदशे दिने भवति। वैदिकदृष्ट्या एषा अत्यन्तं शुभा मन्यते, यतः अस्मिन्नेव दिने उत्तरायणस्य आरम्भः भवति, अर्थात् सूर्यस्य उत्तरदिशि गमनम्। अतः भगवान् सूर्यस्य आराधनायै सूर्ययागः अतीव महत्त्वपूर्णः मन्यते, यस्मिन् मन्त्रैः, आहुतिभिः, संकल्पेन च सूर्यदेवस्य उपासना क्रियते। मकरसंक्रान्तौ सूर्ययागस्य विशेषं फलम् उक्तं यतः एषः कालः सूर्यस्य बलस्य, तेजसः, धर्मस्थितेः च परिवर्तनस्य सूचकः अस्ति। कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य शास्त्रविद्यागुरुकुलस्य तथा वेदवैदिकविज्ञानविभागस्य संयुक्ततत्त्वावधाने दिनाङ्के १५-०१-२०२६ मकरसंक्रान्तिनिमित्तं सूर्ययागः आयोजितः। विश्वविद्यालयस्य माननीयकुलगुरोः प्रो. अतुलवैद्यस्य प्रेरणया, वेदविद्यासंकायस्य अधिष्ठातुः एवं शास्त्रविद्यागुरुकुलसञ्चालकस्य प्रो. हरेकृष्ण-अगस्तेः मार्गदर्शनेन, वेदवैदिकविज्ञानविभागप्रमुखस्य डॉ. अमितभार्गवस्य तथा शास्त्रविद्यागुरुकुलस्य वेदविषयकप्राध्यापकस्य एवं अर्हणासमन्वयकस्य डॉ. निशान्तमिश्रस्य आचार्यत्वे, परमपूज्य-गोळवलकर-गुरुजी-गुरुकुलम्-परिसरे जातवेदसी-यज्ञशालायां माघकृष्णद्वादश्यां दिनाङ्के १५-०१-२०२६ गुरुवासरे प्रातः ११ वादनतः १२।३० वादनपर्यन्तं सूर्ययागः विधिवत् सम्पन्नः।उत्तरयज्ञस्य प्रारम्भः स्वस्तिवाचनपूर्वकं कृतः। पूजाक्रमे प्रधानसंकल्पः, श्रीगणपतिपूजनम्, कलशपूजनम्, सूर्यपूजनं च सम्पन्नम्। तदनन्तरं कुशकण्डिका, कुण्डपूजनम्, अग्निस्थापनम्, नवग्रहशान्तिः, सूर्यसूक्तेन हवनं च कृतम्। अस्य यागस्य मुख्ययजमानः शास्त्रविद्यागुरुकुलस्य प्राध्यापिका डॉ. श्वेताशर्मा आसीत्। यागकर्मणि शास्त्रविद्यागुरुकुलस्य प्राध्यापकः डॉ. आशीष् जे., योगविभागप्रमुखः डॉ. सचिन्द्विवेदी, डॉ. अश्विनीशुक्ला तथा अन्ये प्राध्यापकाः आहुतिप्रदानं कृत्वा पूर्णाहुत्या यागं समापितवन्तः।उत्तयागस्य आयोजनं वेदवैदिकविज्ञानविभागप्रमुखस्य डॉ. अमितभार्गवस्य, डॉ. निशान्तमिश्रस्य तथा डॉ. अश्विनीशुक्लायाः आचार्यत्वेन सम्यक् सम्पन्नम्। अस्मिन् यागे विश्वविद्यालयस्य सर्वे छात्राः उपस्थिताः आसन्।

## केन्द्रीय मंत्री अर्जुनराममेघवालः 26 तमायाः राष्ट्रीययुवासंसद-प्रतियोगितायाः विजेतृन् सम्मानितवान्



संसदीयकार्याणां राज्यमन्त्री अर्जुनराममेघवालः नवदिल्लीनगरे जवाहरनवोदयविद्यालयस्य २०२४-२५ कृते २६ तमायाः राष्ट्रिययुवासंसदप्रतियोगितायाः विजेतृभ्यः पुरस्कारवितरणं कृतवान्। प्रतियोगितायां राजस्थानस्य सूरतगढ़े स्थिते पीएम श्री-जवाहर-नवोदय विद्यालयेन प्रथमं स्थानं प्राप्तम्। आयोजनं सम्बोधयन् मेघवालमहोदयः छात्राणां जीवनस्य स्वरूपनिर्माणे शिक्षकानां महत्त्वं प्रकाशयन् बृहत्स्वप्नं दृष्टुं प्रोत्साहितवान्।

## 22-23 जनवरी दिनाङ्के बलाहरपरिसरे भविष्यति राष्ट्रियासंगोष्ठी




केन्द्रीयसंस्कृतविश्वविद्यालयस्य बलाहरपरिसरे भारतीयज्ञानपरम्परायां नारी इति विषये द्विदिवसीया राष्ट्रियासंगोष्ठी भविष्यति। अस्मिन् विषये सूचयन् डॉ.मुकेशकुमारः उक्तवान् यत् जनवरी 19 दिनाङ्कः पञ्जीकरणाय अन्तिमदिनाङ्कः वर्तते, येन 20 दिनाङ्के शोधवाचकानाम् अन्तिमा तिथिः प्रकाशयिष्यते। संगोष्ठ्यां पञ्जीकरणं कर्तुं सङ्केतः निम्नप्रकारेणास्ति https://forms.gle/cXLc2qXFbsi5wLFH8

## प्रधानमन्त्री नरेन्द्रमोदी अनेकानि नवीनानि रेलयानानि ध्वजं प्रदास्यति

प्रधानमन्त्री नरेन्द्रमोदी अनेकानि नवीनानि रेलयानानि ध्वजं प्रदास्यति, यत्र पश्चिमबङ्गस्य हावड़ा, असमस्य कामाख्या च सम्बद्धं देशस्य प्रथमं स्लीपरं वन्देभारत एक्स्प्रेस् च अस्ति। अन्येषु रेलयानेषु न्यू जलपैगुरी-नागरकोइल अमृतभारत एक्स्प्रेस्, न्यू जलपैगुरी-तिरुचिरापल्ली अमृतभारत एक्स्प्रेस्, अलीपुरदुआर-एसएमवीटी बेंगलुरु अमृतभारत एक्स्प्रेस्, अलीपुरदुआर-मुम्बई-पन्वेल अमृतभारत एक्स्प्रेस्, राधिकापुर-एसएमवीटी बेंगलुरु मेल एक्स्प्रेस्, तथा बलूरघाट-एसएमवीटी बेंगलुरु मैल इत्यादीनि सन्ति व्यक्त।



✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# वन्दे संस्कृतमातरम् !

असमराज्यस्य विश्वनाथजिलान्तर्गता संस्कृतभारतीगोष्ठी क्रमेण अग्रगतिशीला, प्रगतिशीला च जायमाना अस्तीति दृश्यते । अत्रत्याः बहवः सामान्यजनाः अपि संस्कृतपरिचयम्, तद्विषयकम् अनुरागं च प्राप्नुवन्तः सन्तीति परिलक्ष्यन्ते । २०१८-ख्रिष्टाब्दे गोष्ठीयं नागशङ्करपीठस्य परिसरस्थिते समारदलनि-नामके ग्रामे जन्म लब्धवती । ततः शिशुवत् शनैः एधमाना एषा, इदानीं कैशोर्यावस्थां प्राप्तवती अस्ति । यथा अङ्कुरतः पूर्णवृक्षो जायते, तद्वत् इयमपि अग्रिमकालेषु पूर्णविस्थां प्राप्नुयाद् इत्यत्र न सन्देहः । परन्तु तदर्थम् अत्रत्यानां कार्यकर्तॄणां, संस्कृताध्यापकानां, संस्कृतविद्यार्थिनां, संस्कृतानुरागिणां, पण्डितपुरोहितानां, कथावाचकानां, सामान्यजनानाञ्च समेषाम् एकान्तनिष्ठाभावः, सेवा-सहयोगिता, पारस्परिकी प्रीतिः, सहिष्णुता, औदार्यम् इत्यादयः गुणाः इतोऽपि अपेक्ष्यन्ते । कारणं देवभाषा हि तादृशी वर्तते, या च सदैव सद्गुणान् हि कामयते ।

अतः अस्माभिः सर्वैः सम्भूयः प्रीतिसहयोगेन सह, पूर्णभावनया च संस्कृतम् अग्रे अग्रे नेतुं प्रयत्नः करणीयः । तदा गुप्तकाशी-नामधेयं विश्वनाथक्षेत्रमिदम् अवश्यमपि सार्थकं भविष्यतीति नात्र शङ्कास्थानमिति, शुभम् ।



# आत्मानम् उत्थापयितुं भगवच्चिन्तनम्

जगति सर्वे मनुष्याः सुखम् इच्छन्ति, न कदापि दुःखम् । तस्य सुखस्य प्राप्त्यर्थं ते बहिर्भागे सयत्नम् अन्वेषणं कुर्वन्तः भवन्ति, तथापि ते तन्न प्राप्नुवन्ति । परं तत्सुखं बहिर्न, अपितु आत्मनि एव विद्यते इति न जानन्ति, तस्मात्ते सदैव दुःखिनो हि तिष्ठन्तीति ।यदा मनुष्यः स्वान्तःकरणे स्थितम् ईश्वरं जानीयात्, प्राप्नुयाद्वा, तदा तस्मिन् स्थितं समस्तक्लेशाहङ्काररूपम् अज्ञानं तत्क्षणे हि विनश्येत्, यथा आरात्रिं स्थितः घोरान्धकारः सूर्योदयादनन्तरं हि पूर्णतः समाप्ततां गच्छेत् ।वास्तविकतया दृश्यते यत् यो भगवद्भक्तेरनुरागी, आध्यात्मिकं हि यस्य मूलधनम्, सः सज्जनः उच्यते । एतादृशानां मनसि कस्मादपि कारणात् सहसा उद्भूतः अहङ्कारः, यश्च क्षणिकः, स न दोषाय । यतोहि सः स्वशरीरम् अहमिति न मन्यते, आत्मानं तु ईश्वरांशं मनुते, स समये आगते ईश्वरमपि प्राप्तुमर्हेत् । परन्तु यो भौतिकवादी, स्वशरीरं हि अहमिति मन्यते, यस्य मनसि पारमार्थिक-विश्वासो नास्ति, तादृशस्य अज्ञानिनः मूढस्य अन्तर्दृष्टिर्न भवति । बहिर्जगति स्थितः सः, परदोषादिकं पश्यन्, तथा अहङ्कार-दुष्टभावनादिषु संलग्नः सन् आत्मानं पातयति । इत्येव ज्ञान्यज्ञानिनोः, अथवा सज्जनासज्जनयोर्मध्ये भेदः इति ।तस्माद् आत्मानम् उत्थापयितुं भगवच्चिन्तनम् अत्यन्तम् अनिवार्यमस्ति मनुष्यस्य कृते इति विचारणीयं मनुष्यैरस्माभिः ।